मन्दिरा, स्त्री, ( मन्दिर + स्त्रियां टाप् । ) मन्दिरम् । यथा, मन्दिरायास्तरावागिति मधुसूक्टादयः ॥

मन्दुरा, स्त्री, ( मन्दन्ते स्वपन्ति मोदन्ते वा अश्वा यत्र । मन्द् + "मन्दिवाशिमथीति ।" उणा० १ । ३८ । इति उरच् । स्त्रियां टाप् ।) वाजिशाला । इत्यमरः । २ । २ । ७ ॥ (यथा, नैषधचरिते । १ । ५७ ।

"उपाहरन्नश्वमजस्रचञ्चलैः
खुराञ्चलैः क्षोभितमन्दुरोदरम् ॥")

शयनीयार्थवस्तु । इति मेदिनी । रे, २०० ॥ मादुर इति भाषा ॥

मन्दोदरी, स्त्री, ( मन्दं उदरं यस्याः । स्त्रियां ङीष् ।) रावणमहिषी । सा तु मयदानवकन्या । इति रामायणम् ॥ ( यथा, महाभारते । ३ । २८० । १६ ।

"भार्य्या मे भव सुश्रोणि ! यथा मन्दोदरी
तथा ॥"

कुमारानुचरमातृगणभेदः । यथा, महाभारते । ९ । ४६ । १७ ।

"मन्दोदरी तुण्डुकी च कोटरा मेघवाहिनी ॥")

मन्दोदरीशः, पुं, ( मन्दोदर्य्याः ईशः पतिः । ) रावणः । इति त्रिकाण्डशेषः ॥

मन्दोदरीसुतः, पुं, (मन्दोदर्य्याः सुतः ।) इन्द्रजित् । इति जटाधरः ॥

मन्दोष्णं, क्ली, (मन्दं अल्पं च तदुष्णञ्चेति ।) ईषदुष्णम् । तद्वति, त्रि : इत्यमरः । १ । ४ । २५ ॥

मन्द्रः, पुं, (मन्द्यते स्तूयते अनेन । मदि + "स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् । ) गम्भीरध्वनिः । इत्यमरः । १ । ७ । २ ॥ (यथा, मेघदूते । १०० ।

"मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्-
सुकानि ॥")

वाद्यविशेषः । तत्पर्य्यायः । मर्ज्जुः २ मृदङ्गकः ३ । इति शब्दरत्नावली ॥ ( त्रि, हृष्टः । यथा, ऋग्वेदे । १ । ५ । ७ ।

"होता मन्द्रो वरेण्यः ॥"

"मन्द्रो हृष्टः ।" इति तद्भाष्ये सायनः ॥ मादनशीलः । यथा, ऋग्वेदे । १ । १४४ । ७ ।

"अग्ने ! जुषस्व प्रतिहर्य्य तद्वचो
मन्द्र स्वधाव ऋतजात सुक्रतो ॥"

"मन्द्र ! मादनशील ! ।" इति तद्भाष्ये सायनः ॥)

मन्मथः, पुं, (मनो मथ्नाति विकरोतीति । मन्थ् + पचाद्यच् । पृषोदरादित्वात् साधुः । अस्य नामनिरुक्तिर्यथा, ब्रह्मवैवर्त्ते । १ । ४ । ७ ।

"मनो मथ्नाति सर्व्वेषां पञ्चबाणेन कामिनाम् ।
तन्नाम मन्मथस्तेन प्रवदन्ति मनीषिणः ॥")

कामदेवः । ( यथा, नैषधचरिते । ८ । २९ ।

"न मन्मथस्त्वं स हि नास्तिमूर्त्तिः ॥")

कपित्थवृक्षः । इत्यमरः । १ । ४ । २१ ॥ कामचिन्ता । इति मेदिनी । थे, २२ ॥ * ॥ कामदेवस्योत्पत्तिर्यथा,—

"एवं चिन्तयतस्तस्य ब्रह्मणो मुनिसत्तमाः ।
मनसः पुरुषो वल्गुराविर्भूतो विनिःसृतः ॥
काञ्चनीचूर्णपीताभः पीनोन्नतसुनासिकः ।
सुवृत्तोरुकटीजङ्घो नीलावञ्चितकेशकः ॥
लग्नभ्रूयुगलो लोलः पूर्णचन्द्रनिभाननः ।
कपाटविस्तीर्णहृदि रोमराजीविराजितः ॥
शुभ्रमातङ्गकरवत्पीननिस्तलबाहुकः ।
आरक्तपाणिनयनमुखपादकरोद्भवः ॥
क्षीणमध्यश्चारुदन्तः प्रमत्तगजकन्धरः ।
प्रफुल्लपद्मपत्राक्षः केशरघ्राणतर्पणः ॥
कम्बुग्रीवो मीनकेतुः प्रांशुर्मकरवाहनः ।
पञ्चपुष्पायुधो वेगी पुष्पकोदण्डमण्डितः ॥
कान्तः कटाक्षपातेन भ्रामयन्नयनद्वयम् ।
सुगन्धिमारुताभ्रान्तः शृङ्गाररससेवितम् ॥
वीक्ष्य तं तादृशं दक्षप्रमुखा मानसाश्च ते ।
मरीच्याद्या दश ततो विस्मयाविष्टचेतसः ॥
औत्सुक्यं परमं जग्मुरापूर्व्वैकारिकं मनः ।
स चापि वेधसं वीक्ष्य स्रष्टारं जगतां पतिम् ।
प्रणम्य पुरुषः प्राह विनयानतकन्धरः ॥
श्रीपुरुष उवाच ।
किं करिष्याम्यहं कर्म्म ब्रह्मंस्तत्र नियोजय ।
मानाय्यो पुरुषो यस्मादुचिते शोभिते विधे ॥
अभिधानञ्च यद्योग्यं स्थानं पत्नी च या मम ।
तन्मे कुरुष्व लोकेश ! स्रष्टा त्वं जगतां यतः ॥
मार्कण्डेय उवाच ।
एवं तस्य वचः श्रुत्वा पुरुषस्य महात्मनः ।
क्षणं न किञ्चित् प्रोवाच स्रष्टापि विस्मितः ॥
ततो मनः सुसंयम्य सम्यगुत्सृज्य विस्मयम् ।
उवाच पुरुषं ब्रह्मा तत्कर्म्मोद्दिशमावहन् ॥
ब्रह्मोवाच ।
अनेन चारुरूपेण पुष्पबाणैश्च पञ्चभिः ।
मोहयन् पुरुषांस्त्रीश्च कुरु सृष्टिं सनातनीम् ॥
न देवा न च गन्धर्व्वा न किन्नरमहोरगाः ।
नासुरा न च दैत्या वा न विद्याधरराक्षसाः ॥
न यक्षा न पिशाचाश्च न भूता न विनायकाः ।
न गुह्यका न सिद्धाश्च न मनुष्या न पक्षिणः ॥
पशवो न मृगाः कीटाः पतङ्गा जलजाश्च ये ।
न ते सर्व्वे भविष्यन्ति न लक्ष्या ये शरस्य ते ॥
अहं वा वासुदेवो वा स्थाणुर्वा पुरुषोत्तम ! ।
भविष्यामस्तव वशे किमन्यैः प्राणधारिभिः ॥
प्रच्छन्नरूपो जन्तूनां प्रविशन् हृदये सदा ।
सुखहेतुः स्वयं भूत्वा कुरु सृष्टिं सनातनीम् ॥
त्वत्पुष्पबाणस्य सदा सुलक्ष्यं लक्ष्यं मनोऽस्तु च ।
सर्व्वेषां प्राणिनां नित्यं मदमोदकरो भवान् ॥
इति ते कर्म्म कथितं सृष्टिप्रावर्त्तकं पुनः ।
नामानि च गदिष्यामि यत्ते योग्यं भवि-
ष्यति ॥
मार्कण्डेय उवाच ।
इत्युक्त्वाथ सुरश्रेष्ठो मानसानां मुखानि च ।
आलोक्य चासने पद्मे स्वपविष्टोऽभवत् क्षणात् ॥"

इति कालिकापुराणे कामप्रादुर्भावो नाम १ अध्यायः ॥

मार्कण्डेय उवाच ।
"ततस्ते मुनयः सर्व्वे तदभिप्रायवेदिनः ।
चक्रुस्तदुचितं नाम मरीच्यग्निमुखास्तदा ॥
मुखावलोकनादेव ज्ञात्वा वृत्तान्तमन्यतः ।
दक्षादयश्च स्रष्टारः स्थानं पत्नीञ्च ते ददुः ॥
ततो निश्चित्य नामानि मरीचिप्रमुखा द्विजाः ।
ऊचुः सङ्गतमेतस्मै पुरुषाय द्विजोत्तमाः ॥
ऋषय ऊचुः ।
यस्मात् प्रमथ्य चेतस्त्वं जातोऽस्माकं तथा विधिः ।
तस्मान्मन्मथनाम्ना त्वं लोके गेयो भविष्यसि ॥
जगत्सु कामरूपस्त्वं त्वत्समो न हि विद्यते ।
अतस्त्वं कामनाम्नापि ख्यातो भव मनोभव ! ॥
मदनान्मदनाख्यस्त्वं शम्भोर्दर्पात् सदर्पकः ।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि ॥
त्वद्वाणानां यद्वीर्य्यं तद्वीर्य्यं न भविष्यति ।
वैष्णवानाञ्च रौद्राणां ब्रह्मास्त्राणाञ्च तादृशम् ॥
स्वर्गो मर्त्त्यञ्च पातालं ब्रह्मलोकः सनातनः ।
अवस्थानानि सर्व्वाणि सर्व्वव्यापी भवान् यतः ॥
किंवा चापि विशेषेण सामान्ये नास्ति ते समः ।
यत्र यत्र भवेत् प्राणी शाद्वलास्तरवोऽथवा ॥
तत्र तत्र तव स्थानमस्त्वाब्रह्मसदोदयम् ।
दक्षोऽयं भवतः पत्नीं स्वयं दास्यति शोभ-
नाम् ॥"

इति कालिकापुराणे २ अध्यायः ॥

मन्मथानन्दः, पुं, (मन्मथं आनन्दयतीति । आ + नन्द + णिच् + पचाद्यच् । कामवर्द्धकत्वादस्य तथात्वम् । ) महाराजचूतः । इति राजनिर्घण्टः ॥

मन्मथालयः, पुं, ( मन्मथस्य आलय इव । कामवर्द्धकत्वादेवास्य तथात्वम् । ) आम्रः । इति राजनिर्घण्टः ॥

मन्मनः, पुं, गद्गदध्वनिः । इति त्रिकाण्डशेषः ॥ ( दम्पत्योः कथनविशेषः । यथा, चिन्तामणिधृतवचनम् ।

"सुरते कर्णमूले तु निजदेशीयभाषया ।
दम्पत्योः कथनं यत्तु मन्मनं तं विदुर्बुधाः ॥")

मन्या, स्त्री, (मन्यते ज्ञायते स्तम्भदुःखादिकमनया । मन् + करणे क्यप् । स्त्रियां टाप् । ) ग्रीवायाः पश्चात् शिरा । इत्यमरः । २ । ६ । ६५ ॥ (यथा, सुश्रुते उत्तरतन्त्रे २५ अध्यायः ।

"दोषास्तु दुष्टास्त्रय एव मन्यां
संपीड्य घाटां सुरुजां सुतीव्राम् ।
कुर्व्वन्ति साक्षिभ्रुवशङ्खदेशे
स्थितिं करोत्याशु विशेषतस्तु ॥")

मन्याका, स्त्री, ( मन्येवेति । मन्या + स्वार्थे कन् । स्त्रियां टाप् । सुकन्याक इति वत् न विभाषया ह्रस्वः । ) मन्या । इति शब्दरत्नावली ॥

मन्युः, पुं, (मन्यते ज्ञायतेऽसौ । मन + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणा० ३।२० । इति युच् ।) शोकः । (यथा, भट्टिकाव्ये । ६ । ३० ।

"मन्युर्मन्ये ममास्तम्भीद्विषादोऽस्तभद्युतिम् ॥")